**ध्वनेः स्वरूपम् -** वाच्यार्थपेक्षया व्यंग्येऽर्थे मुख्ये सति ध्वनिरिति कथ्यते। तथाविधं च काव्यं सर्वोत्कृष्टं मन्यते।

**इदमुत्तममतिषायिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः। काव्यप्रकाष 1-4**

**वाच्यातिषयिनि व्यंग्ये ध्वनिस्तत्काव्यमुत्तमम् । साहित्य दर्पण 4-1**

आनन्दवर्धनाचार्यो ध्वनिं लक्षयति-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यंग्क्तः काव्यविषेष स ध्वनिरिति सूरिभिः कथितः। ध्वन्यालोक 1-13**

तथाविध् काव्यं ध्वनिः ध्वनिकाव्यं वा निगद्यते। शब्दार्थयोरेकस्य व्यञ्जकत्वे तदन्यस्य सहकारित्वं प्रतिपद्यते।

**शब्दबोध्यो व्यनक्त्यर्थ शब्दोऽप्यर्थान्तराश्रयः।**

**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता।। साहित्य दर्पण 2-18**

नादैराहितबीजायां बुदौ अन्त्यवर्णश्रवणेन समं शब्दस्य रूपमवधार्यते। ध्वनिरेव शब्दस्वरूपं प्रकाषयति।

**नादैराहितबीजायामन्त्येन ध्वनिना सह।**

**आवृत्तपरिपाकायां बुदौ शब्दोऽवधर्यतो। वाक्य. 1.8**

**ध्वनिरात्मा काव्यस्य-** अभिधालक्षणाव्यापारानन्तरं व्यञ्जनावृत्तिः स्वीक्रियते। व्यञ्जनायाः प्राधान्येन काव्ये कल्पनायाष्चिन्तस्यानुभूत्यादितत्तवानां च समावेषोऽभूत्। कल्पनाया अभावे लक्षणाया व्यञ्जनाया वा प्रवृत्तिर्न प्रसरति। नानुभूतिं विना भावावेषः, भावावेषमन्तरेण न लक्षणा व्यञ्जना वोद्भवति। व्यञ्जनाशक्तिः काव्ये प्रभविष्णुतं रमणीयतां रागात्मकतां च सन्निवेषयति। तदैव काव्ये रमणीयकत्वं जायते।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताया। षिषु. 4-17

ध्वनितत्त्वं न काव्यस्यावयवरूपम्, अपितु- अवयविरूपेण- आत्मरूपेण वा प्रतितिष्ठति। अनेन व्यञ्जना व्यंग्यार्थ प्रधाना अस्ति। व्यञ्जनाषक्तेः स्वीकरणे ये दोषा विविधैः शास्त्रज्ञैरुदभाविताः ते दोषा आनन्दवर्धनेन मम्मटेन च निरस्ताः।

**नाभिधा समयाभावात् हेत्वभावान्नलक्षणा। काव्यप्रकाष 1-15**

**यस्य प्रतीतिमाधातुं लक्षणासमुपास्यते।**

**फले शब्दैकम्येऽत्र व्यंजनान्नापरा क्रिया। काव्यप्रकाष 1-14**

खण्डन-मण्डनाऽदिभिः पुष्टः सर्वमान्योऽयं काव्यसिद्धान्तः। नैतादृषः सिद्धान्तो भुवनेऽन्यत्रावलोक्यते। अत एवैतस्येतत् महत्त्वम्। ध्वनिवादस्य महत्त्वस्य कारण यदत्र सर्वेषामपि काव्यमूलतत्त्वानां रसालंकार- वक्रोक्ति- आदिनां समावेषो भवति। **इति।।**